International Journal of Sanskrit Research 2018; 4(5): 117-120

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 117-120
© 2018 IJSR
www.anantaajournal.com
Received: 12-07-2018
Accepted: 14-08-2018

**चाँदनी**
शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, भारत।

**Correspondence**
**चाँदनी**
शोधच्छात्रा, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, भारत।

# चन्द्रप्रभचरितानुसारिणी जैनतत्त्वमीमांसा

## चाँदनी

### प्रस्तावना

आचार्यवीरनन्दिविरचितं 'चन्द्रप्रभचरितम्' जैनदर्शनाधारितं महाकाव्यमस्ति। प्रस्तुते महाकाव्ये प्रतिपदे जैनदर्शनस्य सिद्धान्ताः परिलक्षिताः भवन्ति। जैनधर्मस्य तीर्थंकरपरम्परायां अष्टमतीर्थंकर-चन्द्रप्रभस्य जीवनाधारिते काव्येऽस्मिन् अन्यदर्शनसिद्धान्तखण्डनपुरस्सरं जैनदर्शनसिद्धान्ताः प्रतिष्ठापिताः।

### तत्त्वमीमांसा

जैनदर्शने सप्तपदार्थाः वर्णितास्सन्ति त एव सप्तपदार्थाः चन्द्रप्रभचरितेऽपि समाख्याताः सन्ति। तत्र उक्तमस्ति यत् जीव-अजीव-आस्रव-बन्ध-संवर-निर्जरा- मोक्षाः इति सप्ततत्त्वानि सन्ति। [1] पाप-पुण्यौ न पृथगुक्तौ बन्ध एवान्तर्भूतत्वात्। पृथक्करणे नवतत्त्वानि जैनदर्शने भविष्यन्ति। जिनागमेषु नवपदार्थानां चर्चा प्राप्यते। [2]

### जीवः

जैनदर्शने जीवस्य लक्षणं चेतना अस्ति। जीव एव शुभाशुभकर्मणां कर्ता-भोक्ता चास्ति। स च देहपरिमाणी अस्ति। सः यं शरीरं प्राप्नोति तस्मिन्नेव स्थिरो भवति। स आत्मा उत्पादव्ययध्रौव्यात्मकः अस्ति। [3]

जैनदर्शनस्य स्पष्टसिद्धान्तः अस्ति यत् जीवेन यान्यपि शुभाशुभकर्माणि क्रियन्ते तेषां फलमपि तेनैव प्राप्यते।

आचार्यवीरनन्दी कथयति यत् जीवः उत्पाद-व्यय-ध्रौव्यात्मकः अस्ति अर्थात् सर्वेषु सतपदार्थेषु (जीवेषु) एते त्रयः गुणाः भवन्ति। जीवद्रव्येण स्वजात्याः अत्यागः एव ध्रौव्यमस्ति। भिन्न-भिन्न परिमाणे उत्पन्नः विनाशश्च उत्पाद-व्ययौः स्तः। जीवे एतेषां त्रयाणां स्थितिः त्रिषु कालेषु भवति।

जीव तत्त्वम् विशेषेण व्याख्यातुम् आचार्यवीरनन्दी कथयति भव्य-अभव्यतया जीवः द्विप्रकारकः भवति। पुनश्च नरकादि चतुर्गतिभेदेन अयं चतुर्प्रकारकः भवति। [4]

जीवस्य भव्यता अर्थात् मोक्षं प्रति गमनयोग्यता तथा च तं प्रति गमनायोग्यतैव अभव्यता अस्ति।

आचार्य उमास्वातिः स्वकीये महनीये ग्रन्थे तत्त्वार्थसूत्रे जीवस्य भेदद्वयं कथयति-संसारी मुक्तश्च। [5] आचार्य उमास्वातेः अनुकरणमेव करोति आचार्य वीरनन्दी स्वकीये ग्रन्थे अस्मिन् प्रकरणे। अस्मिन्नेव प्रसङ्गे अग्रे कथयति आचार्यः यत् गतिः अर्थात् एक-जन्मतः अग्रजन्मनः स्थितिं प्राप्तये जीवस्य यात्रा गतिः उच्यते। अस्याः गतेः आधारेण जीवस्य चत्वारः भेदाः भवन्ति नारकः, तीर्यञ्च, मनुष्यः, देवः।

स्थावरजीवान व्याख्यायन् आचार्यः लिखति कायभेदेन स्थावरजीवाः पञ्चप्रकारकाः भवन्ति - पृथिवीकायिक - जलकायिक - तेजस्कायिक - वायुकायिक - वनस्पतिकायिकश्च। एते सर्वे एकेन्द्रियाः भवन्ति। [6]

तदनन्तरं आचार्यः एकेन्द्रियतः पञ्चेन्द्रिय पर्यन्तं जीवानां नामकरणदृष्ट्या विचारं करोति यत् एकेन्द्रियजीवे मात्रस्पर्शन-इन्द्रियः भवति द्वीन्द्रिये च स्पर्शनं रसनञ्च। तथैव त्रीन्द्रिये स्पर्शनं रसना घ्राणश्च। चतुरिन्द्रिये स्पर्शनं-रसना-घ्राणः- चक्षुश्च। पञ्चेन्द्रियजीवेषु पञ्चेन्द्रियाः स्पर्शनं-रसना-घ्राणः-चक्षुः श्रोत्रश्च भवन्ति। [7]

एनमनेन रेखाचित्रेणावगन्तुं शक्यते।

| पञ्चेन्द्रियः | स्पर्शनम् | रसनम् | घ्राणः | चक्षुः | श्रोत्रम् |
|---|---|---|---|---|---|
| चतुरिन्द्रियः | ✓ | ✓ | ✓ | ✓ | × |
| त्रीन्द्रियः | ✓ | ✓ | ✓ | × | × |
| द्वीन्द्रियः | ✓ | ✓ | × | × | × |
| एकेन्द्रियः | ✓ | × | × | × | × |

एवमाचार्य वीरनन्दिना स्वकाव्यस्य अष्टादशे सर्गे एकोनषष्टिः श्लोकेषु विभिन्न जीवाः तेषां प्रकाराः आयुः शरीर परिमाणम् एकेन्द्रियतः पञ्चेन्द्रियत जीवाः, गत्याधारे मनुष्याणां भेदाः तेषां भोगभूमयः विभिन्नप्रकारकाः देवाः तेषामायुश्च व्याख्याताः।

**अजीवः**

आचार्यवीरनन्दी जीववर्णनानन्तरं द्वितीयं तत्त्वं अजीवं विवृणोति। अजीवस्य लक्षणं आचार्येण पृथक्तया न प्रदत्तं परं सामान्यतया अजीवं जीवविपरीतम् अस्ति। यस्मिन् चेतनायाः अभावः भवति पदार्थः अजीवः भवति। आचार्यः अजीवतत्त्वस्य पञ्चभेदान् कथयति धर्म-अधर्म-आकाश-काल-पुद्गलाः। [8] एतेषु पञ्चसु कालं त्यक्त्वा जीवं च सम्मेल्य पञ्च अस्तिकायाः सन्ति। कालः एकः अनस्तिकायः अस्ति। [9] कालः अस्तिकायः नास्ति यतो हि कालः वर्तमाने एव भवति न तु भूतकाले न च भविष्यकाले तस्य स्थितिः सम्भवा।

**धर्मः**

धर्मं परिभाषयन् आचार्यवीरनन्दी लिखति यथा जलं तरणगतौ मत्स्यानां सहायकः भवति तथैव धर्मः गतौ जीवानां पुद्गलानाञ्च सहायकः भवति। अर्थात् सर्वाणि द्रव्याणि स्वगत्यर्थं धर्मे निर्भराणि सन्ति। [10]

**अधर्मः**

अधर्मः धर्मस्य विपरीतः भवति। अधर्मः पुद्गलादिद्रव्याणां स्थितौ सहायकः भवति। अधर्मः अमूर्तः नित्यः समस्तलोकाकाशव्यापकोऽस्ति। [11]

**आकाशः**

आचार्यः कथयति यत् आकाशः नित्यः सर्वव्यापकश्चास्ति। जीवादिसर्वद्रव्येभ्यः स्थानप्रदानमस्य लक्षणमस्ति। अस्मिन् त्रस-स्थावरः - जङ्गमादयः सर्वे जीवाः अबाधं सगतिकाः भवन्ति, निवसन्ति च। [12] जैनदर्शनं अन्यदर्शनैः समं आकाशद्रव्यं मनुते परं जैनदर्शनं आकाशं अनन्तप्रदेशात्मकं मनुते। आकाशे अनन्तजीवद्रव्याणि अनन्तपरमाणवः समाहिताः भवन्ति। [13]

**कालः**

आचार्यः वीरनन्दी कालद्रव्यं अजीवं मनुते। कालस्य लक्षणं करोति आचार्यः वर्तना एवं निश्चयकालः अस्ति। कालः स्वयं परिणमनशीलः पदार्थानाञ्च परिणमने सहायकः भवति।

**पुद्गलः**

आचार्यः कथयति यस्मिन् रूपरसगन्धस्पर्शाः भवन्ति सः पुद्गलः भवति। पुद्गलः द्विप्रकारकः भवति-अणुस्कन्धभेदात्। पूरणगलनस्वभावः भवत्ययम् अत एव अस्मिन् अणु-स्कन्धभेदः घटितः भवति। [14]

**आस्रवः**

जीव-अजीवयोः वर्णनानन्तरं आचार्यः तृतीयं तत्त्वं आस्रवं विवृणोति। आस्रवस्य लक्षणं करोति आचार्यः यत् जीवस्य कर्मणां सम्बन्धकारकः पदार्थः आस्रवः उच्यते। आस्रवः मनः वचनकार्याणां योगेन भवति। [15] अग्रे कथयति आचार्यः यत् शुभयोगः पुण्यस्य आस्रवः अर्थात् बन्धनहेतुः भवति तथैव अशुभयोगः पापस्य आस्रवः भवति। अस्य आस्रवस्य द्वौ स्वामिनौ भवतः- 1. सकषाय जीवः - यस्मिन् क्रोधलोभादि-कषायाणामुदयः भवति सः सकषायः भवति। 2. अकषायः - यस्मिन् क्रोधादि-कषायाः न भवन्ति ते अकषायाः भवन्ति। सकषायजीवानां साम्परायिक- आस्रवः भवति अकषाय-जीवनाञ्च ईर्यापथ-आस्रवः भवति। [16]

आचार्य वीरनन्दिना विभिन्नानि आस्रवकारणानि प्रतिपादितानि यथा-गुरुनाम- अदर्शनम्, मात्सर्यम् आसादनादयः ज्ञानावरण-दर्शनावरण-आस्रवस्य कारणानि सन्ति। [17] परिवेदन-सन्तापाक्रन्दनवधादयः असातावेदनीय-कर्म-आस्रवस्य कारणानि सन्ति। [18]

**बन्धः**

आचार्य वीरनन्दी प्राप्तक्रमं तत्त्वं 'बन्धं' विवृणोति यत् सकषायभूते सति जीवस्य कर्मयोग्यपुद्गलैस्सह सम्बन्धः 'बन्धः' उच्यते। [19] पुद्गलैस्सह जीवस्य सम्बन्धः मिथ्यादर्शनं-अविरति-प्रमाद-कषाय- योगैः पञ्चकारणैः भवति। [20] जैनागमेषु बन्धः चतुर्धा प्रख्यापितः-प्रकृतिबन्धः -स्थितिबन्धः -अनुभागबन्धः प्रदेशबन्धश्च। [21]

**संवरः**

आचार्यवीरनन्दी 'चन्द्रप्रभचरितम्' महाकाव्ये प्राप्तक्रमं तत्त्वं 'संवर' आख्यं विवृणोति- 'आस्रवस्य निरोधः संवरः उच्यते अर्थात् आगमनशीलानां कर्मणां निरोधः संवरः। संवरोऽयं - चारित्र-गुप्तिः-अनुप्रेक्षा-परीषह-जय-दशलक्षणधर्मैः समितिभिश्च भवति।[22]

आत्मिक-शुद्धदशायां स्थितिप्रयत्नः चारित्रमुच्यते। आचार्य उमास्वातिना तत्त्वार्थसूत्रे परिणामशुद्धेः तरतमभावापेक्षया पञ्चभेदाः वर्णिताः। [23]

तत्त्वार्थसूत्रे उमास्वातिः कथयति यत् योगानां पूर्णरूपेण निग्रहः गुप्तिः अस्ति। [24]

गहनचिन्तनम् अनुप्रेक्षा उच्यते। तात्त्विकगहनचिन्तनेन रागद्वेषादिवृत्तयः स्थीयन्ते अतः चिन्तनमिदं संवरोपायम् उच्यते। [25]

मार्गाच्युतिः कर्मक्षयार्थं यत् सहनीयं तत् परीषहः उच्यते। आचार्यउमास्वातिना क्षुक्षा-तृषादयः द्वाविंशतिः परीषहाः गणिताः। [26]

जैनधर्मदर्शने क्षमादिदशप्रकारकः गुणाः धर्मः अस्ति। एते गुणाः सवंरस्य उपायाः सन्ति। जैनधर्मे समितीनां विवेकयुक्तप्रवृत्तिः संवरस्य उपायाः सन्ति। जैनधर्मे समितीनां सम्यक्-ईर्यादयः पञ्चभेदाः सन्ति। [27]

**निर्जरा**

'चन्द्रप्रभचरिते' आचार्यवीरनन्दी निर्जरानामकं तत्त्वं विवृणोति पूर्वतः संयुक्तानि कर्माणि यया प्रक्रियया विसंयुज्यन्ते सा 'निर्जरा' कथ्यते। तस्याः निर्जरायाः प्रकारद्वयं भवति-सविपाकः अविपाकश्च। [28]

आचार्य वीरनन्दी सविपाकनिर्जराविषये लिखति यत् नरकादिगतिषु कर्मफलभोगं तथा च स्वसमयानुसारं फलं प्रदाय बद्धकर्मणां अवियोजनं 'सविपाकनिर्जरा' अस्ति। तपश्चरणेन कर्मणामवियोजनम् 'अविपाक-निर्जरा' अस्ति। [29]

निर्जराया वर्णनेऽस्मिन् आचार्यवीरनन्दी कथयति निर्जरायाः कारणं तपः अस्ति यत् षड्बाह्य षड्-आभ्यन्तरभेदेन द्वादशप्रकारकमस्ति। [30] अनशनं-अवमौदर्य-वृत्तिपरिसंख्यान-रस परित्यागः- विविक्तशयनासन-कायक्लेशाख्यानि षड् बाह्यतपांसि सन्ति। स्वाध्याय-वैयावृत्ति-ध्यान-व्युत्सर्ग-विनय-प्राश्चित्तानि षड् आभ्यान्तरतपांसि सन्ति। [31]

**कैवल्यम् (मोक्षः)**

अग्रिमं तत्त्वं 'कैवल्यं' व्याख्यायन् आचार्य वीरनन्दी कथयति सर्वकर्मणां क्षयः मोक्षः भवति। मोक्षः परिणामिनित्यः अस्ति यः भव्यजीवानामेव सम्भवः अस्ति। मोक्षस्य उपायं सम्यक् दर्शनज्ञानचारित्रनामकं रत्नत्रयम् अस्ति। निर्जरया कर्मणां आत्यन्तिकः क्षयः भवति तथा च मोक्षेण सर्वकर्मणाम् अभावः भवति तथा च जीवस्य जन्ममरणचक्रात् मुक्तिः मोक्षः भवति।

आचार्य वीरनन्दी सम्यक्ज्ञानादीन् विवृणोति जीव-अजीवादिसप्ततत्त्वानां प्रकाशनकारि ज्ञानं सम्यग्ज्ञानं भवति जीवादितत्त्वेषु रुचिकारि सम्यग्दर्शनं भवति, पापादि-आरम्भपरित्यागः सम्यक्चारित्रं भवति। [32]

आचार्य वीरनन्दी कथयति यत् सम्यग्ज्ञानादित्रिरत्नम् ज्ञानावरणादिअष्टकर्मणां प्रतिकूलतया मुक्तिकारणम् अस्ति। यतः सम्यग्यज्ञानादिवर्धनेन रागादिकषायाणां क्षयः दृश्यते। [33] रागादिकषायक्षयेन सर्वकर्मक्षयः भवति। अस्यां प्रक्रियायां रत्नत्रयं कारणम् अस्ति। यदा कर्मक्षयो भवति तदा जीवः स्वशरीरस्याकारं धृत्वा अग्निरिव स्वभावेन लोकाग्रभावं गच्छति। [34] एवं जीवः 'मोक्षं' प्राप्नोति। भवचक्राच्च मुक्तो भवति।

**निष्कर्षः**

शोधपत्रस्यास्य निष्कर्षरूपेण एवं वक्तुं शक्यते यत् जैनदर्शनस्य तत्त्वमीमांसायाः निरूपणम् आचार्यवीरनन्दिना स्वग्रन्थे चन्द्रप्रभचरिते सवस्तिरेण व्यधायि। चन्द्रप्रभचरितस्य वर्णनमिदं अष्टादशे सर्गे प्राप्यते। महाकाव्येऽस्मिन् जीवाजीवास्त्रवबन्धसंवरनिर्जराकैवल्यानि सप्ततत्त्वानि वर्णितानि सन्ति। चेतनालक्षणात्मकस्य जीवस्य भव्याभव्य-नरकादिगतिभेदेन बहवः भेदाः भवति। अजीवः अनस्त्यस्तिकायभेदेन द्विधा भवति पुनश्च अस्तिकायः धर्माधर्माकाशपुदगलभेदेन चतुर्धा विभक्तो भवति अनस्तिकायः कालभेदेन एक एव भवति। कर्मणां जीवं प्रति आगमनम् आस्रवः, जीवस्य तैः बन्धनं बन्धः, आगमनशीलानां कर्मपुद्गलानां निरोधः सवरः, अश्लिष्टानां कर्मपुद्गलानां वियोजनं निर्जरा कर्मभ्यः सम्पूर्णमुक्तिश्च कैवल्यं भवति।

एवं ज्ञायते यत् यथा भट्टिकाव्ये व्याकरणसिद्धान्तानां वर्णनमस्ति तथैव शान्तरसप्रधानात्मके महाकाव्येऽस्मिन् प्रायः सर्वेषां जैनसिद्धान्तानां वर्णनमस्ति।

## संधर्व ग्रन्थ्


1. जीवाजीवास्रवा बन्धसंवरावथ निर्जरा।
   मोक्षश्चेति जिनेन्द्राणां सप्त तत्त्वानि शासने।। च.च. 18/2
2. बन्ध एव प्रविष्टत्यावादनुक्तिः पुण्यपापयोः।
   तयोः पृथक्त्वपक्षे च पदार्था नव कीर्तिताः।। च.च. 18/3
3. चेतनालक्षणो जीवः कर्ता भोक्ता स्वकर्मणाम्।
   स्थितः शरीरमानेन स्थित्युत्पत्तिव्ययात्मकः।। च.च. 18/4
4. भव्याभव्यप्रभेदेन द्विप्रकारोऽप्यसौ पुनः।
   नरकादिगतेर्भेदाच्चतुर्धा भेदमश्नुते।। .च. 18/5
5. संसारिणो मुक्ताश्च-तत्त्वार्थसूत्र 2/10 पृ.-53
6. स्थावराः कायभेदेन पञ्चधा परिकीर्तिताः।
   पृथिवीकायिकाः केचित्केचिदप्कायिकाः स्मृताः।।
   तेजःकायभृतः केचिदपरे वायुकायिकाः।
   स्युर्वनस्पतिकायाश्च सर्वेऽप्येकेन्द्रियाः स्मृताः।। च. च. 18/18-19
7. स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रमितीन्द्रियम्।
   वर्धनीयं क्रमादेतेष्वेकैकं द्वीन्द्रियादिषु।। च.च. 18/22
8. धर्माधर्मावथाकाशं कालः पुद्गल इत्यपि।
   अजीवः पञ्चधा ज्ञेयो जिनागमविशारदैः।। च.च. - 18/67
9. एतान्येव सजीवानि षड् द्रव्याणि प्रचक्षते
   कालहीनानि पञ्चास्तिकायास्तान्येव कीर्तिताः।। तत्रैव - 18/68
10. जलवन्मस्त्ययानस्य तत्र यो गतिकारणम्।
    जीवादीनां पदार्थानां स धर्मः परिवर्णितः।। तत्रैव - 18/69
11. द्रव्याणां पुद्गलादीनामधर्मः स्थितिकारणम्।
    लोकाभि व्यापकत्वादिधर्मोऽधर्मोऽपि धर्मवत्।। च.च. - 18/71
12. नित्यं व्यापकमाकाशमवगा हैकलक्षणम्।
    चराचराणि भूतानि यत्रासंबाधमासते।। च.च. - 18/72
13. धर्माधर्मैकजीवानामसंख्येयाः प्रकीर्तिताः।
    प्रदेशाः सकलज्ञानैर्व्योमानन्तप्रदेशकम्।। च.च. - 18/73
14. रुपगन्धरसस्पर्शशब्दवान् पुद्गलः स्मृतः।
    अणुस्कन्धप्रभेदेन द्विस्वभावतया स्थितः।। च.च. - 18/78
15. विभक्तमित्यजीवस्य रूपमागमवर्णितम्।
    संप्रत्यास्रवतत्त्वस्य किंचिद्रूपं निरूप्यते।। च. च. - 18/81
16. शुभः पुण्यस्य पापस्य विपरीतः प्रकीर्तितः।
    सकषायोऽकषायश्च तस्य द्वौ स्वामिनौ स्मृतौ।। च. च. - 18/83
17. तत्रासादनमात्सर्यगुरुनिह्नवनादयः।
    ज्ञानावृतिद्दृगावृत्योरास्रवत्वेन वर्णिताः।। च. च. - 18/84
18. परिदेवनसंतापशोकाक्रन्दवधादयः।
    असातवेदनीयस्य कर्मणः समनुस्मृताः।। च. च. - 18/85
19. सकषायतया जन्तोः कर्मयोग्यैर्निरन्तरम्।
    पुद्गलैः सह संबन्धो बन्ध इत्यभिधीयते।। च. च. - 18/96
20. असम्यग्दर्शनं योगा विरतेश्च विपर्ययः।
    प्रमादाश्च कषायाश्च पञ्च बन्धस्य हेतवः।। च. च. - 18/95
21. विभेदात्प्रकृतिस्थित्योरनुभागप्रदेशयाः।
    जिनागमनदी स्नातैर्विज्ञेयः स चतुर्विधः।। च. च. - 18/97
22. आस्रावस्य निरोधो यः संवरः स निगद्यते।
    कर्म संव्रियते येनेत्येवं व्युत्पत्तिसंश्रयात्।।
    चारित्रगुप्त्यनुप्रेक्षापरीषहजयादसौ।
    दशलक्षणधर्माच्च समितिभ्यश्च जायते।। च. च. - 18/106-107
23. सामयिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायथाख्यातानिचारित्रम्
    । तत्त्वार्थसूत्रम् 9/18, पृ.-217

24. 'सम्यग्योगनिग्रहो गुप्तिः' तत्त्वार्थसूत्रम् 9/4, पृ.-207
25. अनित्याशरणसंसारैकत्वान्यत्वाशुचित्वास्रवसंवरनिर्जरालोकबोधिदुर्लभध र्मरवाख्यातत्वानुचिन्तन- मनुप्रेक्षाः। तत्त्वार्थ. -9/7, पृ.-211
26. क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याक्रोशवधयाच नाऽलाभरोगतृणस्पर्शमल- सत्कारपुरस्कारप्रज्ञाज्ञानादर्शनानि।। तत्वार्थ- 9/9, पृ.-213
27. ईर्याभाषैषणादाननिक्षेपोत्सर्गाः समितयः।
    उत्तमः
    क्षमामार्दवार्जवशौचसत्यसंयमतपस्त्यागाकिञ्चन्यब्रह्मचर्याणिधर्मः।
    तत्त्वार्थसूत्रम् 9/5-6, पृ. 207-208
28. यथाकालकृता काचिदुपक्रमकृतापरा।
    निर्जरा द्विविधा ज्ञेया कर्मक्षपणलक्षणा।। च. च. - 18/109
29. या कर्मभुक्तिः श्वभ्रादौ सा यथाकालजा स्मृता।
    तपसा निर्जरा या तु सा चोपक्रमनिर्जरा।। तत्रैव 18/110
30. स्थितं द्वादशभिर्भेदैर्निर्जराकरणं तपः।
    बाह्यमाभ्यन्तरं चेति मूलभेदद्वयान्वितम्।। च. च. - 18/111
31. उपवासावमोदर्ये वृतिसंख्या रसोज्झनम्।
    विविक्तवासता कायक्लेशश्चेति बहिर्भवम्।।
    स्वाध्यायो व्यावृतिर्ध्यानं व्युत्सर्गो विनयस्तथा।
    प्रायश्चित्तमिति ज्ञेयमान्तरं षड्विधं तपः।। तत्रैव - 18/112-113
32. तत्त्वप्रकाशकं ज्ञानं दर्शनं तत्त्वरोचकम्।
    पापारम्भपरित्यागश्चारित्रमिति कथ्यते।। चं च. 18/124
33. कर्मणां प्रतिपक्षत्वान्मुक्तेर्ज्ञानादि कारणम्।
    ज्ञानादीनां विवृद्ध्या हि रागादिक्षयदर्शनात्।। च. च. 18/128
34. क्षीणकर्मा ततो जीवः स्वदेहाकृतिमुद्वहन्।
    ऊर्ध्वं स्वभावतो याति वह्निज्वालाकलापवत्।। च. च. 18/130